राँची विश्वविद्यालय के अन्तर्गत पीएच० डी० शोधोपाधि हेतु प्रस्तुत

शोध-प्रारूप

“ संस्कृतरूपकेषु कञ्चुकिनो वैशिष्ट्यसमीक्षा ”

मानविकी संकाय के अन्तर्गत

शोध निर्देशिका

डॉ० मधुलिका वर्मा

एसोसिएट प्रोफेसर एवं पूर्व विभागाध्यक्ष

स्नातकोत्तर संस्कृत विभाग

राँची विश्वविद्यालय, राँची

शोधार्थी

दीपा प्रामाणिक

स्नातकोत्तर संस्कृत विभाग

राँची विश्वविद्यालय, राँची

संस्कृतरूपकेषु कञ्चुकिनो वैशिष्ट्यसमीक्षा

1. उपोद्धातः

संस्कृतसाहित्ये दृश्यकाव्यं श्रव्यकाव्यञ्च उभयमेव लक्ष्यते । यतो हि नाटकं दृश्यकाव्यं वर्तते, अतः एतत् साधारणजनानां कृते अत्यन्त सुलभं भवति। साधारणजनाः चरित्राणाम् अनुकरणम् अनेन रूपकमाध्यमेन एव कुर्वन्ति। दर्शनेन श्रवनेन च रूपकं अत्यन्तं सक्रियत्वं लभते यत् अन्यस्मिन् साहित्ये नैव लक्ष्यते। सम्भाषणेन रूपकस्य सर्वाणि चरित्राणि विकसन्ति। भारतवर्षस्य विभिन्नेषु स्थानेषु भिन्नरूपेण मुख्यचरित्रान् गौणचरित्रान् च संगृह्य गवेषणां जातम् अस्ति। किञ्च भाविकालेष्वपि भविष्यन्येव। तेषु एकं महत्वपूर्णं चरित्रं वर्तते कञ्चुकिनः चरित्रम्। संस्कृतरूपकेषु कञ्चुकिनः भूमिकामाश्रित्य एकः शोधात्मकः प्रबन्धः सुतरामेव अपेक्षते। यतो हि, संस्कृतरूपकेषु कञ्चुकिनः अतीव महत्त्वपूर्णा भूमिका वर्तते। कञ्चुकिनः साधारणतया राज्ञः अन्तःपुरस्य रक्षकाः भवन्ति। राज्ञः अन्तःपुरस्य यस्मिन् भागे राज्ञा सह राजमहिषिणः, राजपरिवारसम्बद्धाः नार्यश्च वसन्ति, तत्रैव राज्ञं विहाय पुरुषरूपेण केवलं कञ्चुकी एव वसति। राजानं राजपुत्रान् च विहाय यत्र अन्येषां पुरुषाणां प्रवेशाधिकारो न भवति, तत्र कञ्चुकी प्रवेष्टुं शक्नोति। अर्थात्, कञ्चुकी राज्ञः अन्तःपुरस्य बहिर्जगतश्च संयोजकः। कञ्चुकी अन्तःपुरस्य वार्तां राज्ञे यच्छति, राज्ञः वार्ताञ्च अन्तःपुरस्य राजामहिषीभ्यः प्रददाति।[१] वस्तुतः, कञ्चुकी राज्ञः अन्तःपुरस्य च मध्ये संयोगं रक्षति। तस्मात् रूपके कञ्चुकी अतीव महत्त्वपूर्णं पात्रं वर्तते। तत्र अन्तःपुरे तिष्ठते राज्ञे काचन वार्ता प्रेषणीया चेत् कञ्चुकिनः प्रयोजनं भवति।[२] कञ्चुकी वहुत्र रूपकेषु परिणतिमपि नियन्त्रितवान्। तत्र अभिशाकुन्तलम् इति रूपकस्य पञ्चमेऽङ्के दृश्यते यत् राजपुर्यां शकुन्तलायाः आगमनवार्तां कञ्चुकी अत्यन्तं शीघ्रतया अन्तःपुरे स्थिताय राज्ञे निवेदितवान्। यतो हि, तस्मिन् काले राजसभां परित्याज्य राजा अन्तःपुरं प्रविष्टवान् आसीत्। अस्मिन् क्षणे कञ्चुकी यदि शीघ्रतया अन्तःपुरे स्थिताय राज्ञे शकुन्तलायाः आगमनवार्तां नैव प्रेषितवान् स्यात्, तर्हि रूपकस्य अग्रगतिः व्याहता स्यात्। अस्याः घटनायाः साक्षात्परमेव राज्ञः अङ्गुरीयकं धीवरात् प्राप्तमासीत्। अङ्गुरीयकमिदं दृष्ट्वा राजा शकुन्तलां स्मृतवान्। अङ्गुरीयकस्य प्राप्तेः पूर्वमेव शकुन्तलां पूर्णतया विस्मृतवान् राजा तां परित्यक्तवान्। तत्र यदि अङ्गुरीयकस्य प्राप्तेः

---

[१] कातरा येऽप्यशक्ता वा नोत्साहस्तेयु जायते।
प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते।। - भासः. *स्वप्नवासवदत्तम्.* सम्पा. शान्ति वन्द्योपाध्याय. कोलकाता संस्कृत पुस्तक भाण्डार, २००४, पृ. १९९

[२] जयतु जयतु देवः। एते खलु हिमगिरेरुपत्यकारण्यवासिनः काश्यपसन्देशमादाय सस्त्रीकास्तपस्विनः संप्राप्ताः। श्रुत्वा देवः प्रमाणम्। - कालिदासः. *अभिज्ञानशकुन्तलम्.* सम्पा. सत्यनारायण चक्रवर्ती. कोलकाता संस्कृत पुस्तक भाण्डार, २०१०(सप्तम संस्करण), पृ.३१४

परमेव शकुन्तलायाः दर्शनं राज्ञा प्राप्तं स्यात्, तर्हि राजा तां नैव परित्यक्तवान् स्यात्। तथा च तस्मिन् क्षणे एव राज्ञः शकुन्तलायाश्च मेलनेन रूपकस्य समाप्तिः स्यात्। तस्मात् कञ्चुकीद्वारैव अस्य रूपकस्य अग्रगतिरभवत् इति सुतरां वक्तुं शक्यते। एवं, सूक्ष्मतया विचारे क्रियमाणे परिलक्ष्यते यत् संस्कृतरूपकेषु कञ्चुकिनः महत् प्रयोजनं वर्तत एव। कञ्चुकीद्वारा प्रदत्ता वार्ता न केवलं रूपकस्य गतिं परिणतिं वा प्रभावयति, नायकस्य नायिकायाश्च चरित्रमपि प्रभावयति। तत्रैव रूपके शकुन्तलायाः

आगमनवार्ता राज्ञे अत्यन्तं शीघ्रतया प्रेषिता कञ्चुकिना, येन राज्ञा शकुन्तला प्रत्याख्याता अभवत्। एवं, कञ्चुकिनः वार्ताप्रदाने अतिसक्रियता शकुन्तलायाः जीवनं प्रभावितवती।[१]

शकुन्तलायाः पतिगृहं प्रति आगमनस्य वार्तैव शीघ्रतया राज्ञे प्रेषितेति कारणादेव शकुन्तलायाः दुष्यन्तस्य च चरित्रयोः परिवर्तनं जातम्। शकुन्तला राजानं प्रति दुष्टवाक्यान्यपि प्रयुक्तवती। तत्र च राजा स्वपत्नीं शकुन्तलामेव परित्यक्तवान्।

एवमेव, अभिज्ञानशाकुन्तलम् इति रूपकं विहाय स्वप्नवासवदत्तम्, मुद्राराक्षसम् इत्यादिरूपकेष्वपि कञ्चुकिनः महान् प्रभावः परिलक्ष्यते।

2. उद्देश्यम्/प्रयोजनम्

विषयेऽस्मिन् गवेषणायाः प्रयोजनं विचार्यते चेत् केचन विषयाः प्रतीयन्ते -

१. प्राचीनसमाजव्यवस्थायाः विषये ज्ञानं वर्धते।

२. कञ्चुकीसदृशः सामान्यः राजभृत्यः कथं राजानं अन्तःपुरञ्च परिचालयति तस्य ज्ञानं भवति।

३. कञ्चुकिनः कर्मपटुत्वं कार्यैकतानता च ज्ञायते।

४. कञ्चुकिनः राजान्तःपुरस्थानाञ्च मध्ये उपकार्योपकारकभावो ज्ञायते।

५. रूपकस्य अग्रगमने परिणतौ च कञ्चुकिनोऽवदानम्।

६. कञ्चुकिनः कार्येण रूपकस्य सार्थकता सौन्दर्यञ्च कथं वर्ध्यते, तस्मिन् विषये विचारः।

---

[१] भोः, कामं धर्मकार्यमनतिपात्यं देवस्य। तथापीदानीमेव धर्मासनादुत्थिताय पुनरुपरोधकारि कण्वशिष्यागमनमस्मै नोत्सहे निवेदयितुम्। अथवा अविश्रमोऽयं लोकतन्त्राधिकारः। -कालिदासः. *अभिज्ञानशकुन्तलम्.* सम्पा. सत्यनारायण चक्रवर्ती. कोलकाता संस्कृत पुस्तक भाण्डार, २०१० (सप्तम संस्करण), पृ.३१४

७. आदर्शसाहित्यसर्जने कञ्चुकिनोऽवदानम्।

८. तत्कालीनसमाजे राज्ञः अन्तःपुरे रक्षिणामावश्यकता।

अनेन शोधप्रबन्धेन संस्कृतरूपके राजान्तःपुरस्य चित्रं, राज्ञा सह अन्तःपुरस्य सम्बन्धः, राज्ञः अन्तःपुरस्य च सम्बन्धस्थापने कञ्चुकिनो भूमिका इत्यादिविषयाः ज्ञायन्ते। इतोऽपि कञ्चुक्यादयः राजकर्मचारिणः कथं कार्यं कुर्वन्ति स्मेत्यस्मिन् विषयेऽपि ज्ञानं भवति। तत्कालीनसमाजे राजकर्मचारिणां कीदृशी भूमिका आसीदित्यस्मिन् विषये ज्ञानं भवति। अस्मिन् शोधप्रबन्धे तत्कालीनसमाजे राज्ञः अन्तःपुरस्य व्यवस्था, राजकर्मचारिणां प्रभावः इत्यादिविषये मौलिकचिन्तनानि प्रदर्श्यन्ते।

3. साहित्यसमीक्षा/जातकार्यसर्वेक्षणम्

भरतस्य नाट्यशास्त्रे विश्वनाथस्य साहित्यदर्पणे च कञ्चुकिनो लक्षणविषये आलोचनं कृतमस्ति।

नाट्यकार:	रूपक:	कञ्चुकीनाम:	समय:
भास:	प्रतिज्ञा-यौगन्धरायण	बादरायन:	१००ई.पु.-२००ई.पु.
भवभूति:	उत्तररामचरितम्	गृष्टि:	सप्तमशतक
भास:	दूतवाक्यम्	बादरायण:	१००ई.पु. -२००ई.पु.
हर्ष:	रत्नावली:	बाभ्रव्य:	सप्तमशतक
भास:	स्वप्नवासवदत्तम्	बादरायण:	१००ई.पु. -२००ई.पु.
भट्टनारायण:	वेणीसंहारम्	जयन्धर:विनयन्धर: च	अष्टमशतक
कालिदास:	अभिज्ञानशाकुन्तलम्	वातायन:	ई.पू. प्रथमशतक
कालिदास:	मालविकाग्निमित्रम्	मौदगल्य:	ई.पू. प्रथमशतक
कालिदास:	विक्रमोर्वशीयम्	लातव्य:	ई.पू. प्रथमशतक
विशाखदत्त:	मुद्राराक्षसम्	वैहीनरि:जाजलि: च	षष्टशतक
हर्षवर्धन:	प्रियदर्शिका	विनयवसु:	सप्तमशतक

संस्कृतरूपकसम्बन्धविषयान् आश्रित्य शोधः न केवलं भारतवर्षे, अपि तु समग्रे विश्वेऽपि शोधकार्याणि क्रियन्ते। तत्र रूपकसम्बन्धविषयान् आश्रित्य नैकानि शोधपत्राणि प्राप्यन्ते, परन्तु रूपकस्य अप्रधानपुरुषचरित्रविशेषं कञ्चुकिनमाश्रित्य विशेषतया शोधप्रबन्धाः न प्राप्यन्ते।

इतोऽपि, मया कोलकाताविश्वविद्यालयः, पञ्जावविश्वविद्यालयः, पटनाविश्वविद्यालयः इत्यादिविश्वविद्यालयानां संस्कृतपत्रिकाः अधीताः। परन्तु तासु पत्रिकासु कञ्चुकिनमाश्रित्य शोधप्रबन्धाः नैव प्रकाशिताः।

4. शोधविषयस्यौचित्यं महत्त्वञ्च

अनेन शोधप्रबन्धेन संस्कृतरूपकेषु कञ्चुकिनोऽवदानस्य तत्कालीनसमाजव्यवस्थायाश्च ज्ञानं भवति।

१. तत्कालीनसमाजव्यवस्थायां राज्ञः राजान्तःपुरस्य च अवस्थानम्।

२. राज्ञः राजान्तःपुरस्य च सम्बन्धः।

३. समाजे राजमहिष्याः प्रभावः।

४. राज्ञा सह राजमहिष्याः सम्बन्धः।

५. राजान्तःपुरस्य प्रयोजनम्।

इत्येतेषां विषयाणां ज्ञानेन वयं तत्कालीनसमाजस्य विषये ज्ञातुं शक्नुमः। इदञ्च ज्ञानम् अस्माकं वर्तमानस्य भाविनो च जीवनस्य मार्गं प्रदर्शयतीति आशा। प्राचीनभारतीयसमाजे राज्ञः राजान्तःपुरस्य च सम्बन्धः कथमासीदित्यस्मिन् विषये ज्ञानं भवति। एते च विषयाः वर्तमानजीवनेन सह विचार्य भाविनो जीवनस्य मार्गप्रदर्शने उपजीव्यभुताः भवन्ति।

5. शोधप्रविधिः

शोधप्रबन्धेऽस्मिन् विश्लेषणात्मिका विमर्शात्मिका च पद्धती आश्रिते। अत्र शोधस्य विषयाः नैकैः उदाहरणप्रमाणैः विश्लिष्य विचार्यन्ते। विश्लेषणे विचारे च युक्तयः उपस्थाप्यन्ते। युक्तिद्वारा संस्कृतरूपकेषु कञ्चुकिनोऽवदानं विचार्यते। कञ्चुकी रूपकस्य परिणतिं कथं प्रभावयति, तदपि विचार्यते। वस्तुतः, शोधेऽस्मिन् विश्लेषणपूर्वकविचारेणैव सिद्धान्तः उपस्थाप्यते।

6. प्रस्ताविताध्यायविभाजनम्

१. प्रथमोऽध्याय: – काव्यं तस्य भेदाः प्रभेदाश्च

१.१. विभिन्नालङ्कारिकानांमतानुसारैकाव्यस्य परिभाषा

१.२. काव्यविभागानांसामान्यपरिचयः

१.३. रूपकोपरूपकानाञ्चपरिभाषा:

१.४. रूपकोपरूपकानाञ्चभेदाः

२. द्वितीयोऽध्याय: – संस्कृतरूपकेषु कञ्चुकिनः परिभाषा वर्णनञ्च

२.१. संस्कृतरूपकेषुविभिन्नपात्रानांपरिचयः

२.२. संस्कृतरूपकेषुविभिन्नपात्रानांमहत्त्वम्

२.३. कञ्चुकिन: परिचयः

२.५. कञ्चुकिन: वर्णनम्

३. तृतीयोऽध्याय: – विभिन्नरूपकेषु कञ्चुकिनोऽवदानम्

३.१. भास: - प्रतिज्ञायौगन्धरायणम्, दूतवाक्यम्, स्वप्नवासवदत्तम्,

३.२. कालिदासः - अभिज्ञानशाकुन्तलम्, मालविकाग्निमित्रम् , विक्रमोर्वशीयम्

३.३. भवभूति: - उत्तररामचरितम्

३.४. विशाखदत्तः - मुद्राराक्षसम्

३.५. हर्षवर्धनः - प्रियदर्शिका , रत्नावली

३.६. भट्टनारायण: - वेणीसंहारम्

४. चतुर्थोऽध्याय: - संस्कृतरूपकेषु कञ्चुकिन: वचनशैली

४.१. कञ्चुकिनःसंवादस्यपरिभाषा

४.२. कञ्चुकिनःसंवादस्यमहत्त्वम्

४.३. कञ्चुकिनःसंलापस्यपरिभाषा

४.४. कञ्चुकिनःसंलापस्यममहत्त्वम्

५. पञ्चमोऽध्याय: - संस्कृतरूपकेषु कञ्चुकिनो व्यक्तिगतजीवनम्

५.१. कञ्चुकिनःसामाजिकजीवनम्

५.२. कञ्चुकिन: आर्थिकजीवनम्

५.३. कञ्चुकिन: राजनैतिकजीवनम्

५.५. कञ्चुकिन: पारिवारिकजीवनम्

६. षष्ठोऽध्यायः - कञ्चुकिन: चरित्रं राजभवनेषु तस्य प्रासंगिकता च

६.१. कञ्चुकिनोविद्वता

६.२. राजमहलेकञ्चुकिनोव्यवहारः

६.३. राज्ञासहअन्त:पुरस्यसम्बन्धः

६.४. अन्त:पुरेकञ्चुकिन: आवश्यकता

६.५. राज्ञासहकञ्चुकिनःसम्बन्धः

६.६. राजभवनेषुकञ्चुकिन: कर्मकुशलता

7. उपसंहारः

संस्कृतरूपकेषु अप्रधानपुरुषचरित्रेषु कञ्चुकिनः चरित्रम् अत्यन्तं महत्त्वपूर्णं वर्तते। रूपके कञ्चुक्यभिधेयस्य पात्रस्य प्रयोगस्य प्रयोजनं विचार्यते। रूपकस्य अग्रगतौ परिणतौ च कञ्चुकिनः प्रभावः अनेन शोधप्रबन्धेन दर्शयिष्यते। इतोऽपि, कञ्चुकिनः व्यक्तिजीवनं, कर्मजीवनम्, अन्तःपुरेण सह कञ्चुकिनः सम्बन्धः इत्यादयः विषयाः अस्मिन् शोधप्रबन्धे प्रदर्श्यन्ते। किञ्च, संस्कृतरूपकेषु प्रतिफलितं प्राचीनभारतस्य समाजचित्रमपि अनेन शोधप्रबन्धेन ज्ञातुं शक्यते। प्राचीनभारतस्य समाजसंस्कृत्योः ज्ञानं वर्तमानजीवनस्य भाविनो जीवनस्य च मार्गं प्रदर्शयति।

8. परिशीलितग्रन्थपञ्जिः

कालिदासः. *अभिज्ञानशकुन्तलम्.* सम्पा. सत्यनारायण चक्रवर्ती. कोलकाता संस्कृत पुस्तक भाण्डार, २०१०(सप्तम संस्करण).

भट्टनारायणः. *वेणीसंहारम्.* सम्पा. कालिपददर्शनाचार्य. कोलकाता संस्कृत वुक डिपो, २०१६ (प्रथम संस्करण).

भवभूतिः. *उत्तररामचरितम्.* सम्पा. सीतानाथ आचार्य. कोलकाता संस्कृत पुस्तक भाण्डार, २०१५ (प्रथम संस्करण).

भासः. *स्वप्नवासवदत्तम्.* सम्पा. शान्ति वन्द्योपाध्याय. कोलकाता संस्कृत पुस्तक भाण्डार, २००४.

वन्द्योपाध्याय, धीरेन्द्रनाथ. *संस्कृत साहित्येर इतिहास.* कोलकाता पश्चिमबङ्ग राज्य पुस्तक पर्षत्, २०१२ (द्वितीय संस्करण).

विशाखदत्तः. *मुद्राराक्षसम्.* सम्पा. सीतानाथ आचार्य. कोलकाता संस्कृत पुस्तक भाण्डार, २००९ (द्वितीय संस्करण).

श्रीहर्षः. *रत्नावली.* सम्पा. ज्योति सेनगुप्ता. कोलकाता संस्कृत वुक डिपो, २०१६.

****आवश्यकतानुसारंतस्यविस्तारःपरिवर्तनं च कर्तुंशक्यते

-----------×××---------